**SET NO. – 10/122**

ROLL NO. | | | | | | | |

Candidates must write the Set No. on the title page of the answer book

# D.A.V PUBLIC SCHOOLS, ODISHA ZONE-I
## PERIODIC TEST-II, 2017-18

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 09 हैं।
- प्रश्न-पत्र में दहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में 14 प्रश्न हैं।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनिट का समय दिया गया है। छात्र केवल प्रश्न-पत्र को पढ़ेंगें और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे।

## CLASS – X
## कक्षा - दशमी
## COMMUNICATIVE SANSKRIT
## सम्प्रेषणात्मकम् संस्कृतम्

Time : 3 hours
अवधि : होरात्रयम्

Maximum Marks : 80
पूर्णाङ्का: : ८०

| | | | |
|---|---|---|---|
| खण्ड: क | : | अपठितांश-अवबोधनम् | 10 अंका: |
| खण्ड: ख | : | रचनात्मककार्यम् | 15 अंका: |
| खण्ड: ग | : | अनुप्रयुक्तव्याकरणम् | 25 अंका: |
| खण्ड: घ | : | पठित-अवबोधनम् | 30 अंका: |

*निर्देश :*

*(i) अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति।*

*(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(iii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iv) सर्वेषां प्रश्नानाम् उत्तराणि **संस्कृतेन** लेखनीयानि।*

## खण्डः क

## अपठितांश-अवबोधनम्

10 अङ्काः

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत –

अस्माकं राष्ट्रध्वजः त्रिभिः वर्णैः संयुतः। ध्वजे त्रिपट्टिकाः विराजन्ते। प्रथमा पट्टिका काषायवर्णा। द्वितीया खलु पट्टिका श्वेतवर्णा। तृतीया पट्टिका हरितवर्णा। श्वेत-पट्टिकायाः मध्ये अशोकचक्रं विद्यते। ध्वजस्य काषायवर्णः उत्साहं त्यागं च द्योतयति। श्वेतवर्णः शान्तिं सत्यं च सूचयति। हरितवर्णः सुख-समृद्धयोः विकासस्य च सूचकः अस्ति। मध्यभागे स्थितम् अशोकचक्रं धर्मस्य सत्यस्य अहिंसायाः च प्रतीकम् अस्ति।

I. एकपदेन उत्तरत – ½x4=2

i) ध्वजस्य कस्मिन् भागे अशोकचक्रं विद्यते?

ii) राष्ट्रध्वजे प्रथमपट्टिकायाः वर्णः कीदृशः?

iii) अस्माकम् राष्ट्रध्वजे कति वर्णाः सन्ति?

iv) हरितवर्णः कस्य सूचकः अस्ति?

II. पूर्णवाक्येन उत्तरत – 2x2=4

i) अशोकचक्रं केषां गुणानाम् प्रतीकम् अस्ति?

ii) ध्वजे त्रिपट्टिकाणाम् वर्णाः कीदृशाः भवन्ति?

III. निर्देशानुसारम् उत्तरत – ½x4=2

i) 'विद्यते' इति क्रियापदस्य कर्तृपदम् किम्?

क) श्वेतपट्टिका ख) मध्ये

ग) अशोकचक्रं घ) राष्ट्रध्वजः

ii) 'प्रथमा पट्टिका काषायवर्णा' अत्र विशेष्यपदं किम्?

क) प्रथमा ख) पट्टिका

ग) काषायवर्णा घ) वर्णा

iii) 'चिह्नम्' इति अर्थे किं पदम् अनुच्छेदे प्रयुक्तम्?

क) द्योतयति ख) प्रतीकम्

ग) सूचकः घ) संयुतः

iv) 'विनाशस्य' इति पदस्य विलोमपदं किम् प्रयुज्यते?

क) उत्साहः ख) शान्तिम्

ग) विकासस्य घ) त्यागस्य

IV. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिख। 2

## खण्डः ख
### रचनात्मककार्यम्

15 अङ्काः

2. मित्रं प्रति लिखितं पत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः लिखत – ½x10=5

(i) _______

(ii) _______ गौरव।

सस्नेहं (iii) _______ ।

गतमासे अहं (iv) _______ मात्रा च सह भ्रमणार्थं मेघालयप्रदेशम् अगच्छम्। (v) _______ सौन्दर्यम् अद्भुतम्। (vi) _______ सुन्दरं पर्वतीयस्थलम् (vii) _______ वृक्षैः पर्वतैः च सुसज्जितम्। इयं वस्तुतः देवभूमिः एव अस्ति। इमं सुरम्यं प्रदेशं दृष्ट्वा (viii) _______ यत् पर्वताः सदैव रम्याः एव। अहं त्वया सह अपि एकवारम् (ix) _______ तत्र गन्तुम् इच्छामि। आशासे आवां शीघ्रमेव तत्र पर्वतानां मध्ये भविष्यावः।

सर्वेभ्यः मम नमस्काराः कथनीयाः। शीघ्रं मिलावः।


(x) _______ मित्रम्

अङ्कुरः।

**मञ्जूषा**

| |
|---|
| भवतः, इदम्, केरलतः, विशालैः, नमस्काराः, पुनः, अनुभूयते, मेघालयप्रदेशस्य, पित्रा, प्रियमित्र |

3. चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्चवाक्यानि लिखत – 2x5=10



**मञ्जूषा**

| |
|---|
| व्याघ्रः, मार्गे, पर्यटकाः, मोटरवाहनेषु, सन्ति, आगच्छन्ति, रोमाञ्चकः, अनुभवः, बहिः, वने, शनैः, वन्यजीवानां संरक्षणार्थम्, रक्षितवनक्षेत्राणि, पृष्ठतः, अस्माकम्, कर्त्तव्यम्, चलति |

*अथवा*

'देशभक्तिः' इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन पञ्चवाक्यानि लिखत। 2x5=10

**मञ्जूषा**

| |
|---|
| कथ्यते, देशस्य भक्तिः, देशभक्ति-भावनया, प्राणान्, सैनिकाः, देशहिताय, त्यजन्ति, राष्ट्रभावनायाः, आवश्यकता, देशस्य विकासाय, स्वार्थं परित्यज्य, कर्त्तव्यम्, भवन्ति, वयं छात्राः, पठित्वा, सम्यक्, शिक्षकाः, चिकित्सकाः, सर्वैः, कर्तव्यम्। |

## खण्डः ग

## अनुप्रयुक्तव्याकरणम् 25 अङ्काः

4. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत – 1x4=4

i) यौवनं धनं <u>चायुः</u>।
क) च + आयुः ख) चा + आयुः ग) च + अयुः घ) चा + अयुः

ii) <u>यथा + उचितं</u> क्रियताम्।
क) यथाऽचितं ख) यथोचितं ग) यथौचितम् घ) यथाऽचितम्

iii) <u>बलादिव</u> नियोजितः पुरुषः पापं चरति।
क) बल + आदिव ख) बलाद् + इव ग) बलात् + इव घ) बलादि + इव

iv) कः <u>शुचिः इह</u>?
क) शुचि इह ख) शुचो इह ग) शुचिह घ) शुचिरिह

5. रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत – 1x4=4

i) <u>शीतला छाया</u> पुरुषं प्रह्लादयति?
क) शीतला छाया ख) शीतलछाया
ग) शीतलच्छाया घ) शीतलाच्छाया

ii) रामः <u>पञ्चवटी</u> इति स्थाने अवसत्।
क) पञ्चानां वटीनां ख) पञ्चानां वटानां समाहारः
ग) पञ्च वटानां समाहारः घ) पञ्च वटीनां समाहारः

iii) साधुजनमैत्री <u>सुखं ददाति इति</u> सर्वे वदन्ति।
क) सुखदः ख) सुखद ग) सुखदा घ) सुखदाः

iv) <u>अनृतं</u> मा वद।
क) न ऋतं ख) अन ऋतं ग) न रुतं घ) अन रुतं

6. रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितं उत्तरं विकल्पेभ्य: चित्वा लिखत – 1x4=4

i) पितर: सदैव वन्द् + अनीयर्।

क) वन्दनीय: ख) वन्दनीया: ग) वन्दनीया घ) वन्दनीयम्

ii) अस्माभि: परस्परम् स्नेहेन वद् + तव्यत्।

क) वदितव्य: ख) वदितव्या: ग) वदितव्यम् घ) वदितव्या

iii) स: सुखी नर:।

क) सुख + इन् ख) सुख + ङीप् ग) सुख + ठक् घ) सुख + मतुप्

iv) सार्वकालिका: अस्य उपदेशा:।

क) सार्वकाल + ठक् ख) सर्वकाल + ठक्

ग) सार्वकलि + ठक् घ) सार्वकाल + इक

7. संवादं कोष्ठकात् उचितपदै: पूरयित्वा लिखत – 1x3=3

*लता* - सीते! कुत्र गच्छसि?

*सीता* - मया तु कुत्रापि न i) _______। (गच्छामि, गम्यते, गच्छसि)

*लता* - किं ii) _______ प्रदर्शनी न दृश्यते। (त्वम्, त्वया, त्वाम्)

*सीता* - नहि मया तु iii) _______ पठ्यते, श्व: परीक्षा अस्ति। (पुस्तक:, पुस्तकम्, पुस्तकेन)

8. प्रदत्तविकल्पेभ्य: शुद्धं समयं चित्वा रिक्तस्थानानि पूरयत – ½x4=2

i) अहम् प्रात: _______ (7.15) वादने विद्यालयं गच्छामि।

क) सपाद-सप्त ख) पादोन-सप्त ग) सार्ध-सप्त घ) सप्तवादने

ii) मध्याह्ने _______ (12.45) वादने विद्यालयात् गृहम् आगच्छामि।

क) द्वादशवादने ख) सपाद-द्वादश ग) पादोन-द्वादश घ) पादोन-एक

iii) मध्याह्ने _______ (2.30) वादने क्रीड़ायै गच्छामि।

क) पादोन-द्वि ख) सार्ध-द्वि ग) सपाद-द्वि घ) पादोन-त्रि

iv) रात्रौ _______ (9.00) वादने भोजनं करोमि।

क) नव ख) पादोन-नव ग) सपाद-नव घ) सार्ध-नव

9. कोष्ठकात् चित्वा उचितै: अव्ययपदै: रिक्तस्थानानि पूरयत – 1x4=4

i) समुद्रेषु वृष्टि: _______। (शनै:, इतस्तत:, वृथा, अधुना)

ii) कर: कमलम् _______। (अपि, एव, इव, पुरा)

iii) अहम् _______ भोजनम् खादामि। (ह्य:, श्व:, अधुना, अत्र-तत्र)

iv) सिंह: _______ गर्जति। (इदानीम्, उच्चै:, सहसा, विना)

10. अधोलिखतवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। प्रदत्तविकल्पेभ्य: उचितम् उत्तरं चित्वा अशुद्धपदं संशोध्य लिखत – 1x4=4

i) स: बालिका क्रीड़ति।
क) बालकौ ख) बालके ग) बालक: घ) बालका:

ii) श्व: भवन्त: कुत्र पठथ।
क) अपठन् ख) पठिष्यन्ति ग) पठन्ति घ) पठिष्यथ

iii) त्वं कदा चलचित्रं द्रक्ष्याम:।
क) पश्यथ ख) द्रक्ष्यन्ति ग) द्रक्ष्यसि घ) पश्याव:

iv) द्वे बालिके अत्र क्रीड़न्ति।
क) क्रीड़ति ख) क्रीड़त: ग) क्रीड़थ: घ) क्रीड़थ

## खण्ड: घ
## पठित-अवबोधनम्
30 अङ्का:

11. अधोलिखितम् गद्यांशं पद्यं नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –

अ) गद्यांश

अथ अन्यस्मिन् अहनि मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताड़ित:। ऊर्णाप्रचुर: मेष: वह्निना जाज्वल्यमानशरीर: निकटस्थाम् अश्वशालां प्रविशति दाहवेदनया च भूमौ लुठति। तस्य क्षितौ प्रलुठत: तृणेषु वह्निज्वाला: समुत्थिता:। ज्वालामालाकुला: अश्वा: प्राणत्राणाय इतस्तत: अधावन्। तेषु केचित् दग्धा: केचिद् अर्धदग्धा: केचन च पञ्चत्वं गता:।

I. एकपदेन उत्तरत – 1x2=2
i) सूपकारेण क: ताड़ित: ?
ii) अश्वा: किमर्थम् अधावन् ?

II. पूर्णवाक्येन उत्तरत – 2
वह्निना जाज्वल्यमानशरीर: मेष: किम् अकरोत् ?

III. निर्देशानुसारम् उत्तरत – ½x4=2
i) 'प्रविशति' इति क्रियापदस्य कर्तृपदं किम् ?
क) अश्वशालां ख) ऊर्णाप्रचुर:
ग) मेष: घ) जाज्वल्यमानशरीर:

ii) 'तस्य क्षितौ प्रलुठतः' अत्र 'तस्य' सर्वनामपदं कस्मै प्रयुज्यते ?

| | |
|---|---|
| क) सुपकाराय | ख) अश्वाय |
| ग) मेषाय | घ) वानराय |

iii) 'निकटस्थाम् ... लुठति' अस्मिन् वाक्यांशे विशेषणपदं किम् ?

| | |
|---|---|
| क) अश्वशालां | ख) निकटस्थाम् |
| ग) दाहवेदनया | घ) भूमौ |

iv) गद्यांशे 'दिवसे' इति अर्थे किं पदं प्रयुक्तम् ?

| | |
|---|---|
| क) वह्निना | ख) अहनि |
| ग) तृणेषु | घ) क्षितौ |

**ब) <u>पद्यम्</u>**

असंशयं महावाहो ! मनो दुर्निग्रहं चलम्।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।।

I. एकपदेन उत्तरत – 1x2=2

i) किं दुर्निग्रहम् अस्ति ?

ii) अत्र 'कौन्तेय' कः अस्ति ?

II. पूर्णवाक्येन उत्तरत – 2

मनः कथं गृह्यते ?

III. निर्देशानुसारम् उत्तरत – ½x4=2

i) 'मनः' इति कर्तृपदस्य क्रियापदं किम् ?

| | |
|---|---|
| क) असंशयं | ख) चलम् |
| ग) गृह्यते | घ) वैराग्येण |

ii) 'दुर्निग्रहं' इति पदस्य विशेष्यपदं किम् ?

| | |
|---|---|
| क) असंशयं | ख) चलम् |
| ग) मनः | घ) अभ्यासेन |

iii) 'मोहेन' अस्य विलोमपदं किं प्रयुक्तम् ?

| | |
|---|---|
| क) अभ्यासेन | ख) वैराग्येण |
| ग) कौन्तेय | घ) महावाहो |

iv) 'वशीक्रियते' इति अर्थे किं पदं प्रयुक्तम् ?

| | |
|---|---|
| क) गृह्यते | ख) अभ्यासेन |
| ग) वैराग्येण | घ) असंशयं |

स) <u>नाट्यांश:</u>

(राज्ञि एवं विचारयति सति तस्य दानशीलतां परीक्षितुं देवाधिपति: शक्र: नेत्रहीनयाचकस्य रुपं धारयित्वा तत्पुरत: अवदत्)

*शक्र: -* हे राजन्! भवत: दानवीरताम् आकर्ण्य आशान्वित: भवत्समीपम् आगतोऽस्मि। देव! रवि-शशि-तारामण्डल-भूषितं जगत् एतत् कथमिव पश्येयम् चक्षुर्हीन:।

*राजा -* भगवन्! भवत: मनोरथं पूरयित्वा आत्मानम् अनुगृहीतं कर्तृम् इच्छामि।

*शक्र: -* यदि भवान् प्रीत:, तदा त्वत्त: एकस्य चक्षुष: दानम् इच्छामि येन मम लोकयात्रा निर्वाधा भवेत्।

*राजा -* भो मित्र! किमेकेन चक्षुषा, अहं भवते चक्षुर्द्वयमेव प्रयच्छामि इति।

I. एकपदेन उत्तरत – 1x2=2

i) कस्य दानवीरताम् आकर्ण्य शक्र: आगत: ?

ii) राजा कम् अनुगृहीतं कर्तुम् इच्छति ?

II. पूर्णवाक्येन उत्तरत – 2

शक्र: किमर्थं चक्षुष: दानम् इच्छति ?

III. निर्देशानुसारम् शुद्धम् उत्तरं विकल्पेभ्य: चित्वा लिखत – ½x4=2

i) 'पश्येयम्' इति क्रियापदस्य कर्तृपदं किम् ?

क) चक्षुर्हीन: ख) जगत्
ग) देव घ) अहम्

ii) 'आशान्वित:' इति विशेषण-पदस्य विशेष्यपदं किम् ?

क) भवत: ख) आगत:
ग) अहम् घ) भवत्

iii) 'आत्मानम्' इति पदं कस्मै प्रयुज्यते ?

क) राज्ञे ख) शक्राय
ग) मनोरथाय घ) भगवते

iv) 'चन्द्र:' इति अर्थे किम् पदम् नाट्यांशे प्रयुक्तम् ?

क) रवि ख) शशि
ग) तारा घ) जगत्

12. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत – 1x4=4

i) काम: एव <u>अस्माकम्</u> शत्रु:।

ii) अभीष्टवस्तूनि प्राप्य <u>याचका:</u> तुष्टा: आसन्।

iii) सूर्योदये <u>तम:</u> नश्यति।

iv) पठनस्य <u>षट्</u> गुणा:।

13. श्लोकाभ्यां समुचितपदानि चित्वा अधोलिखितश्लोकद्वयस्य अन्वयं पूरयत –

अ) अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्।। ½x4=2

अन्वयः

हे भारति! तव कः अपि कोशः (i) _______ विद्यते। (अयम्) व्ययतः (ii) _______ आयाति, (iii) _______ च (iv) _______ आयाति।

आ) भगवन्किमुपादेयम्? गुरुवचनम्, हेयमपि च किम्? अकार्यम्।
को गुरुः? अधिगततत्वः शिष्यहितायोद्यतः सततम्।। ½x4=2

अन्वयः

भगवन्! (i) _______ किम्? गुरुवचनम्। अपि च (ii) _______ किम्? अकार्यम्। गुरुः कः? (iii) _______ शिष्यहिताय (iv) _______ अधिगततत्वः।

14. रेखाङ्कितपदानां प्रसङ्गानुसारम् अर्थं चित्वा लिखत – 1x4=4

i) विद्धि एनम् इह वैरिणम्।
क) अर्हति ख) जानीहि
ग) करोति घ) उद्भवति

ii) शुश्रूषा श्रवणं चैव ग्रहणं धारणं तथा।
क) सेवा ख) श्वश्रुः
ग) श्रोतुम् इच्छा घ) निवासम्

iii) का निद्रा? मूढता जन्तोः।
क) आलस्य ख) मूर्खता
ग) महत्ता घ) कटुता

iv) स्वाध्यायाभ्यसनं चैव वाङ्मयं तपः उच्यते।
क) वाचिकम् ख) साहित्यम्
ग) वाक्युक्तम् घ) आहार्यम्

-oOo-